**Roll No. ...................................**

# E–3384

## B. A. (Classics) (Part II) EXAMINATION, 2021

VEDA

**(Optional)**

Paper First

*Time : Three Hours* ] [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. अधस्तनेषु त्रयाणां मन्त्राणां ऋषिच्छन्दोदेवता निर्देशपूर्वकं यथाशास्त्रं व्याख्यायताम्— 20

   (क) इषेष्वोर्ज्जेत्वा वायवस्त्थदेवोवः सविता प्रार्पयतु श्रेष्ठतभाय कर्मण आप्यायध्वमध्न्या इन्द्रायभागं प्रजावतीश्नमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳसोध्रुवा अस्मिनोपतौ स्यत वह्वीर्यजमानस्य पाररन्पाहि॥

   (ख) धान्यमसि धिनुहि देवान्प्राणायत्वो दानायत्वा व्यानायत्वा। दीर्घामनुप्रसितिमायुषेधां देवोवः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनां पयोऽसि॥

P. T. O.

(ग) प्रत्युष्टꣳरक्षः प्रत्युष्टा अरातयो निष्टप्तꣳरक्षो।
निष्टप्ता अशतयः। उर्त्वन्तरिक्षमन्वेमि॥

(घ) कृष्णोऽस्याखरेष्ठोऽग्नयेत्वा जुष्टं प्रोक्षामि। वेदिरसि बर्हिषेत्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि॥

(ङ) मनोजूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमंदधातु। विश्वेदेवास इह मादयन्तामो इ प्रतिष्ठ॥

(च) अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्।
अमीमदन्त पितरो यथाभागमावृषायिषत्॥

2. अधोलिखितेषु मन्त्रखण्डद्वयं यथाशास्त्रं व्याख्यायताम्— 10

(क) वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो धर्मोऽसि विश्वधा असि।

(ख) धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳसेधा देवयजंवह।

(ग) अदित्यै रास्नासि विष्णोर्वेष्योऽस्यूर्जेत्वाऽदधेनत्वा चक्षुषेवपश्यामि।

(घ) समिदासि सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्यै।

3. अधस्तनेषु पञ्चानां पदानां महीधरदिशा व्याख्यायताम्— 10

(i) सविता

(ii) शतधारम्

(iii) विष्णोः

(iv) हिरण्यपाणिः

(v) सहस्रभृष्टिः

(vi) घृतम्

(vii) द्यावापृथिवी

(viii) स्वाहा

4. अधोऽङ्कितेषु ब्राह्मणखण्डेषु किमपि द्वयं यथासन्दर्भ व्याख्या कर्तव्या— 20

(क) व्रतमुपैष्यन। अन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङतिष्ठन्नपऽउपस्पृशति तद्यदपऽउपस्पृशत्यमेध्यो वैपुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्रतामुपायानीति तस्माद्वाऽअपऽउपस्पृशति।

(ख) यज्ञोवाऽअनः। यज्ञो हि वाऽअनस्तस्मादनस एव यजूँ᳘षि सन्ति न कौष्ठस्य न कुम्भ्यै भस्त्रापै ह स्मर्षयो गृह्णन्ति तद्वृषीन प्रति भस्त्रयै यजूँ᳘ष्यासुस्तान्द्येतर्हि प्राकृतानि यज्ञाद्यज्ञं निर्मिमाऽइति तस्मादनस एव गृह्णीयात्।

(ग) शिरोहवाऽएतद्यज्ञस्ययत् पुरोडाशः। स यान्येवेमानि शीर्ष्णः कपालान्येतान्येवास्य कपालानि मस्तिष्कऽएव पिष्टानि तद्वाऽएतदेकमङ्गमेकँ᳘सहकरवाव समानं करवावेति तस्माद्वाङ्गऽएतदुभयँ᳘सह क्रियते।

(घ) ताँ᳘श्रपयति। देवस्त्वा सविता श्रपयत्विति न वा एतस्य मनुष्यः श्रपयिता देवो ह्येष तदेनं देव एव सविता श्रपयति ष्वर्षिष्ठेऽधिनाक इति देवत्रो एतदाह ष्वर्षिष्ठेऽधिनाकऽइति तमभिमृशति श्रृतं व्वेदानीति तस्माद्वाऽअभिमृशति।

5. अधोलिखितेषु विषयत्रयं यथाब्राह्मणं प्रतिपाद्यताम्— 15

(i) सैषात्रयी विद्यायज्ञः

(ii) परिस्तरणम्

(iii) प्रोक्षणीनामपां प्रोक्षणम्

(iv) आप्त्योदकदानम्

(v) वेदिशब्दनिरुक्तिः

(vi) देवानां क्रतुभुक्त्वम्।